# Mahodara Stuti by Ture

# મહોદરસ્તુતિઃ તુરેણ પ્રોક્તા

## Document Information

Text title : Mahodara Stuti by Ture

File name : mahodarastutiHtureNaproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 10

Latest update : April 23, 2020

Send corrections to : Sanskritcheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# મહોદરસ્તુતિઃ તુરેણ પ્રોક્તા

સમાગત્ય સ દૈત્યેન્દ્રો નનામ સ મહોદરમ્ ।
ભક્તિભાવસમાયુક્તઃ પૂજયામાસ યત્નતઃ ॥ ૨૨॥

પૂજયિત્વા યથાન્યાયં પુનસ્તં પ્રણનામ સઃ ।
કૃત્વા કરપુટં મોહસ્તુષ્ટાવ ચ મહોદરમ્ ॥ ૨૩॥

મોહાસુર ઉવાચ -
નમસ્તે બ્રહ્મરૂપાય મહોદર! સુરૂપિણે ।
સર્વેષાં ભોગભોક્ત્રે વૈ દેહદેહિમયાય ચ ॥ ૨૪॥

મૂષકારૂઢદેવાય ત્રિનેત્રાય નમો નમઃ ।
ચતુર્ભુજાય દેવાનાં પતયે તે નમો નમઃ ॥ ૨૫॥

અનાદયે ચ સર્વેષામાદિરૂપાય તે નમઃ ।
વિનાયકાય હેરમ્બ! દીનપાલાય વૈ નમઃ ॥ ૨૬॥

ગણેશાય નિજાનન્દપતયે બ્રહ્મનાયક! ।
સિદ્ધિબુદ્ધિપ્રદાત્રે વૈ બ્રહ્મભૂતાય વૈ નમઃ ॥ ૨૭॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે વૈ યોગશાન્તિમયાય ચ ।
યોગિનાં પતયે તુભ્યં યોગિભ્યો યોગદાયક ! ॥ ૨૮॥

સિદ્ધિબુદ્ધિપતે! નાથ! એકદન્તાય તે નમઃ ।
શૂર્પકર્ણાય શૂરાય વીરાય ચ નમો નમઃ ॥ ૨૯॥

સર્વેષાં મોહકર્ત્રે વૈ ભક્તેભ્યઃ સુખદાયિને ।
અભક્તાનાં વિશેષેણ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૩૦॥

માયાવિને ચ માયાયા આધારાય નમો નમઃ ।
માયિભ્યો માયયા ચૈવ ભ્રાન્તિદાય નમો નમઃ ॥ ૩૧॥

કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ! યત્ર વેદાઃ સહાઙ્ગકાઃ ।

શાન્તિં પ્રાપ્તાસ્તથાઽપિ ત્વં સંસ્તુતોઽસિ દયાપરઃ ॥ ૩૨॥

ધન્યૌ મે પિતરૌ જ્ઞાનં તપઃ સ્વાધ્યાય એવ ચ ।
ધન્યં વપુશ્ચ દેવેશ! યેન દૃષ્ટં પદામ્બુજમ્ ॥ ૩૩॥

મહોદર ઉવાચ ।
મદીયં સોત્રમેતદ્વૈ સર્વદં યત્ત્વયા કૃતમ્ ।
ભવિષ્યતિ જનાયૈવ પઠતે શ◌ૃણ્વતેઽસુર! ॥ ૩૭॥

મોહનાશકરં ચૈવ ભુક્તિમુક્તિપ્રદં ભવેત્ ।
ધનધાન્યાદિદં સર્વં પુત્રપૌત્રસુખપ્રદમ્ ॥ ૩૮॥

ઇતિ તુરેણ પ્રોક્તા મહોદરસ્તુતિઃ સમાપ્તા । ૩.૧૦

Encoded by Ajit Krishnan
Proofread by Ajit Krishnan, PSA Easwaran

*Mahodara Stuti by Ture*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*